# संस्कृतम्

# ( 209 )

## शिक्षक-अङ्कितमूल्याङ्कन-पत्रम्

*पूर्णांका:-20*

*निर्देशा:*

(i) सर्वेप्रश्ना अनिवार्या:। प्रश्नस्य दक्षिणे पार्श्वे संख्या अङ्कान् निर्दिशति।

(ii) उत्तरपुस्तिकाया: प्रथमपृष्ठे स्वनाम, अनुक्रमाङ्कसंख्या, शिक्षणकेन्द्रस्य नाम इति सर्वं लेखनीयम्।

**1. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्दात्मकं लिखत-** **2**

(क) ''त्याज्यं न धैर्यम्'' इति पाठम् आधृत्य ''षड्विधं प्रीतिलक्षणम्'' लेख्यताम्। (पाठ-3, त्याज्यं न धैर्यम)

(ख) ''कस्मात् किं शिक्षेत? इति पाठे सिंह-गर्दभ-वक- कुक्कुटादिम्य: कथं शिक्षा गृहीतव्या इति शिक्षितम्। तदनुसारमेवधेनु-मूषक-नवुल-नदीत्यादिभ्य: का: शिक्षा प्राप्यन्ते इति संक्षेपेण लिखत।

(पाठ-4, कस्मात् किं शिक्षेत?)

**2. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्दात्मकं लिखत-** **2**

(क) ''सुभाशितानि'' इति पाठे प्रदत्तं दशकं धर्म-लक्षणं कथं भवान् स्वजीवने धारयिष्यति? लिखत

(पाठ-1, सुभाशितानि्)

(ख) बोपदेवस्य क: गुण: कथञ्च भवत: जीवनं प्रेरयति? (पाठ-2, प्रेरणा)

**3. कस्यचिदेकस्य प्रश्नस्य उत्तरं 40-60 शब्दात्मकं लिखत-** **2**

(क) ''प्राणस्य श्रेष्ठत्वम्'' पाठं पठित्वा तस्मिन् पाठे प्रदत्तानाम् इन्द्रियाणां नामानि तेषां कार्याणि च लिखत। (पाठ-5, प्राणस्य श्रेष्ठत्वम्)

(ख) ''यद्भविष्यो विनश्यति'' इति पाठे क्त्वा-ल्यप् प्रत्ययान्तानां पदानां चयनं कुरूत वाक्येषु प्रयोगं च प्रदर्शयत। (पाठ-6, यद्भविष्यो विनश्यति)

**4. कस्यचिदेकस्य प्रश्नस्य उत्तरं 100-150 शब्दात्मकं लिखत-** **2**

(क) ''प्राणस्य श्रेष्ठत्वम्'' इति पाठे भवद्भि: पठितं यत् शरीरे प्राणा: एव श्रेष्ठा:। स्वमतानुसारं स्पष्टीकुरुत। (दृष्टव्यम्-5, प्राणस्य श्रेष्ठत्वम)

(ख) ''प्रेरणा'' इति पाठस्य सारं स्वशब्देषु लिखत। (दृष्टव्यम्-2, प्रेरणा)

**5. कस्यचिदेकस्य प्रश्नस्य उत्तरं 100-150 शब्दात्मकं लिखत- 2**

(क) "संसारे कः अपि जीवः तुच्छः नास्ति। सर्वेषु पशुषु पक्षिषु वृक्षेषु च गुणाः सन्ति।" "कस्मात् किं शिक्षेत?" पाठानुसारं वर्णयत्। (पाठ-4, कस्यात् किं शिक्षेत)

(ख) "यद्भविष्यो विनश्यति" इति पाठे भवद्भिः पठितं यत् जीवने साफल्यं भाग्यापेक्षया पुरूषार्थेणैव प्राप्तुं शक्यते। अतः एतादृशम् एवं श्लोकं लिखत यस्मिन् पुरूषार्थ भाग्ययोः पुरूषार्थस्य वैशिष्ट्यं प्रदर्शितं स्याद इति। (पाठ-6, यद्भविष्यो विनश्यति)

**6. अधोलिखितेषु कमपि एकं विषयमधिकृत परियोजना-विवरणं लिखत- 6**

(क) सप्तम् पाठपर्यन्तम् कतमः पाठः भवद्भ्येः रोचते? तस्मात् का शिक्षा प्राप्यते? भवान् भवती स्वजीवने कथं तत् जीवनमूल्यं धारयिष्यति इति वर्णयत।

(ख) अधोलिखितेशु कमपि कथापाठद्वयम् अधिकृत्य तत्र संज्ञापदानि, सर्वनामपदानि, विशेषणपदानि च चित्वा तालिका-निर्माण कुर्वन्तु।

(i) प्रेरणा,

(ii) प्राणस्य श्रेष्ठत्वम्,

(iii) त्याज्यं न धैर्यम्,

(iv) यद्भविष्यो विनष्यति